शम्बरचन्दनं, क्ली, (शम्बरनामकं चन्दनम् ।) चन्दनविशेषः । तत्पर्य्यायः । कैरातम् २ बहलगन्धम् ३ बल्यम् ४ गन्धकाष्ठम् ५ कैरातकम् ६ शैलगन्धम् ७ । अस्य गुणाः । शीतलत्वम् । तिक्तत्वम् । उष्णत्वम् । श्लेष्मानिलश्रमपित्तविस्फोटपामादिकुष्ठतृषातापविमोहनाशित्वञ्च । इति राजनिर्घण्टः ॥

शम्बरसूदनः, पुं, (शम्बरं सूदयतीति । सूद + ल्युः ।) कामदेवः । इति हलायुधः ॥

शम्बरारिः, पुं, (शम्बरस्यारिः ।) कामदेवः । इत्यमरः ॥

शम्बरी, स्त्री, आखुपर्णी । इति मेदिनी ॥ माया । इति शब्दरत्नावली ॥

शम्बलः, पुं, क्ली, कूलम् । पाथेयम् । मत्सरः । इति मेदिनी ॥

शम्बाकृतं, त्रि, (शम्ब + "कृञो द्वितीयतृतीयशम्बबीजात् कृषौ ।" ५।४।५८। इति डाच् ।) द्विवारकृष्टक्षेत्रम् । तत्पर्य्यायः । द्विगुणाकृतम् २ द्वितीयाकृतम् ३ द्विहल्यम् ४ द्विसीत्यम् ५ । इत्यमरः ॥

शम्बुः, पुं, शम्बुकः । यथा,—

"शम्बूकः शम्बुको ज्ञेयः पूर्व्वः कान्तस्तु सर्व्वदा ।
ककारेण विना शेषो दृश्यते ग्रन्थविस्तरे ॥"

इति रुद्रचन्द्रः । इत्यमरटीकायां भरतः ॥

शम्बुकः, पुं, (शम्बु + स्वार्थे कन् ।) शम्बूकः । यथा,

"शम्बूकः शम्बुको ज्ञेयः पूर्व्वः कान्तस्तु सर्व्वदा ।
ककारेण विना शेषो दृश्यते ग्रन्थविस्तरे ॥"

इति रुद्रचन्द्रः । इत्यमरटीकायां भरतः ॥

शम्बुक्कः, पुं, शम्बूकः । इति शब्दरत्नावली ॥

शम्बूकः, पुं स्त्री, (शम् + "उलूकादयश्चेति" उणा० ४ । ४१ । इति ऊकः युगागमश्च निपात्यते ।) जलजन्तुविशेषः । शाम्बूक इति भाषा । तत्पर्य्यायः । जलशुक्तिः २ । इत्यमरः ॥ शम्बुका ३ शम्बुकः ४ शम्बुक्कः ५ शाम्बुकः ६ शम्बुः ७ शाम्बुक्कः ८ । इति शब्दरत्नावली ॥ जलडिम्बः ९ दुश्चरः १० पङ्कमण्डूकः ११ । इति हारावली ॥ पुं, गजकुम्भान्तर्भागः । घोङ्गः । शूद्रतापसः । (यथा, उत्तरचरिते । २ ।

"हत्वाभये त्वयि यमादपि दण्डधारे
सञ्जीवितः शिशुरयं मम चेयमृद्धिः ।
शम्बूक एष शिरसा चरणौ नतस्ते
सत्सङ्गजानि निधनान्यपि तारयन्ति ॥")

इति मेदिनी ॥ दैत्यविशेषः । शङ्खः । इति हेमचन्द्रः क्षुद्रशङ्खः । इति राजनिर्घण्टः ॥

शम्बूका, स्त्री, (शम्बुक + टाप् ।) जलशुक्तिः । इति राजनिर्घण्टः ॥

शम्भलः, पुं, ग्रामविशेषः । अधुना सम्बल-मोरदाबाद इति नाम्ना ख्यातः । तत्र षष्टितीर्थानि सन्ति कल्की चाविर्भूय सहस्रं समाः स्थास्यति । यथा,—

"शम्भले वसतस्तस्य सहस्रं परिवत्सराः ।
अतीता भ्रातृपुत्त्रस्वज्ञातिसम्बन्धिभिः सह ॥
शम्भले शुशुभे शचीसभापयकृचत्वरैः ।
पताकाध्वजचित्राढ्यैर्यथेन्द्रस्यामरावती ॥
यत्रास्ते षष्टितीर्थानां सम्भवः शम्भलेऽभवत् ।
स्नात्वा मोक्षः क्षितौ कल्केरकल्कस्य यथाश्रयः ॥
वनोपवनसन्ताननानाकुसुमसङ्कुलैः ।
शोभितं शम्भलग्रामं मन्ये मोक्षोपमं भुवि ॥
महीमाप्यास्य भगवान् निजजन्मकृतोद्यमः ।
शम्भलग्रामविप्रर्षिमाविवेश परात्मकः ॥
सुमत्यां विष्णुयशसा गर्भमाधत्त वैष्णवम् ।
द्वादश्यां शुक्लपक्षस्य माधवे मासि माधवः ॥
जातो ददृशतुः पुत्त्रं पितरौ हृष्टमानसौ ।
धात्री माता महाषष्ठी नाडीच्छेत्त्री तदाम्बिका ॥
गङ्गोदकक्लेदमोक्षा सावित्री मार्ज्जनोद्यता ।
तस्य विष्णोरनन्तस्य मातृकादात् पयःसुधाम् ॥
सुमतिस्तं सुतं लब्ध्वा विष्णुं जिष्णुं जगत्प्रभुम् ।
पूर्णकामा विप्रमुख्यानाहूयादात् गवां शतम् ॥
तं बालकं नराकारं विष्णुं मत्वा मुनीश्वराः ।
कल्किं कल्कविनाशार्थमाविर्भूतं विदुर्ब्बुधाः ।
नामाकुर्व्वंस्ततस्तस्य कल्किरित्यभिविश्रुतम् ॥"

इति कल्किपुराणे १ अध्यायः ॥

शम्भली, स्त्री, (शम्भं कल्याणयुक्तं नायकादिकं लाति गृह्णातीति । ला + कः । गौरादित्वात् ङीष् ।) कुट्टनी । इत्यमरः ॥

शम्भुः, पुं, (शं मङ्गलं भवत्यस्मादिति । शम् + "मितद्र्वादिभ्य उपसंख्यानम् ।" ३ । २ । १८० । इत्यस्य वार्त्तिकोक्त्या डुः ।) शिवः । इत्यमरः ॥ (यथा, भागवते । ४ । ७ । ५७ ।

"एतद्भगवतः शम्भोः कर्म्म दक्षाध्वरद्रुहः ।
श्रुतं भागवतात् शिष्यादुद्धवान्मे बृहस्पतेः ॥"

एकादशरुद्राणामन्यतमः । यथा, विष्णुपुराणे । १ । ५ । १२३—१२४ ।

"हरश्च बहुरूपश्च त्र्यम्बकश्चापराजितः ।
वृषाकपिश्च शम्भुश्च कपर्द्दी रैवतस्तथा ॥
मृगव्याधश्च शर्व्वश्च कपाली च महामुने ।
एकादशैते प्रथिता रुद्रास्त्रिभुवनेश्वराः ॥")

ब्रह्मा । (यथा, महाभारते । १ । ६४ । ४५ ।

"तामुवाच महाराज भूमिं भूमिपतिः प्रभुः ।
प्रभवः सर्व्वभूतानामीशः शम्भुः प्रजापतिः ॥")

बुद्धः । इति मेदिनी ॥ विष्णुः । इति हलायुधः ॥ (यथा, महाभारते । १२ । ४३ । ७ ।

"त्रिचक्षुः शम्भुरेकस्त्वं विभुर्दामोदरोऽपि च ॥")

सिद्धः । इति शब्दरत्नावली ॥ श्वेतार्कः । इति चन्द्रिका ॥ (अग्निः । यथा, महाभारते । ३ । २२० । ५ ।

"शम्भुमग्निमथ प्राहुर्ब्राह्मणा वेदपारगाः ।
आवसथ्यं द्विजाः प्राहुर्दीप्तमग्निं महाप्रभम् ॥"

सुखस्य भावयितरि, त्रि । यथा, ऋग्वेदे । १ । ४६ । १३ ।

"मनुष्वच्छम्भू आगतम् ॥"

"हे शम्भू सुखस्य भावयितारौ ।" इति तद्भाष्ये सायणः ॥)

शम्भुतनयः, पुं, (शम्भोस्तनयः ।) कार्त्तिकेयः । इति शब्दरत्नावली ॥ गणेशश्च ॥

शम्भुनन्दनः पुं, (शम्भोर्नन्दनः ।) गणेशः । इति शब्दरत्नावली ॥ कार्त्तिकेयश्च ॥

शम्भुप्रिया, स्त्री, (शम्भोः प्रिया ।) आमलकी । इति शब्दचन्द्रिका ॥ दुर्गा च ॥

शम्भुवल्लभं, क्ली, (शम्भोर्वल्लभम् ।) श्वेतकमलम् । इति राजनिर्घण्टः ॥ शिवप्रिये, त्रि ॥

शम्या, स्त्री, (शम्यतेऽनयेति । शम + यत् । टाप् ।) युगकीलकः । इत्यमरः ॥ (यथा, ऋग्वेदे । ३ । ३३ । १३ ।

"उद्व ऊर्म्मिः शम्याः हन्त्वापो योक्त्राणि मुञ्चत ॥")

दक्षिणहस्तगृहीततालविशेषः । इति सङ्गीतशास्त्रम् ॥ (दण्डयष्टिः । इति मेधातिथिः ॥ यथा, मनुः । ८ । २३७ ।

"शम्यापातास्त्रयो वापि त्रिगुणो नगरस्य तु ॥")

शम्याक्षेपः, पुं, (शम्यायाः क्षेपो यत्र ।) अमितक्षिप्तयष्टिप्राप्तयावद्भूप्रदेशः । यथा,—

"भ्रामयित्वा बहुगुणं यष्टिः क्षिप्ता समाप्नुयात् ।
भुवः प्रदेशं यावन्तं शम्याक्षेपः स उच्यते ॥"

इति मार्कण्डेयपुराणे विविंशचरितं नामाध्यायः ॥ (यज्ञविशेषः । यथा, महाभारते । ३ । ९० । ५ ।

"पुण्यश्चाख्यायते दिव्यं शिवमग्निशिरोऽनघ ।
सहदेवोऽयजत् यत्र शम्याक्षेपेण भारत ! ॥"

"बलवता क्षिप्ता शम्या लगुड़विशेषो यावद्दूरं पतेत् तावान् यज्ञमण्डपो यस्मिन् यज्ञे न शम्याक्षेपस्तेन ।" इति तट्टीकायां नीलकण्ठः ॥)

शयः, पुं, (शेते सर्व्वमस्मिन्निति प्रायो वस्तुनः कराधीनत्वात् । शी + पुंसीति घः ।) हस्तः । इत्यमरः ॥ शय्या । सर्पः । इति मेदिनी ॥ निद्रा । पणः । इति विश्वः ॥

शयण्डः, त्रि, (शेते इति । शी + अण्डन् । इत्युज्ज्वलः । १ । १२८ ।) निद्राशीलः । इत्युणादिकोषः ॥ (पुं, विषयः । देशः । इत्युणादिटीका । १ । १२८ ॥)

शयतः, पुं, निद्रालुः । इति संक्षिप्तसारोणादिवृत्तिः ॥

शयथः, पुं, (शेते इति । शीङ् + "शीङ्शपिरुगमि-जीविप्राणिभ्योऽथः ।" उणा० ३ । ११३ । इति अथः ।) अजगरः । मृत्युः । निद्रालुः । इति हेमचन्द्रः ॥ वराहः । मत्स्यः । इति संक्षिप्तसारोणादिवृत्तिः ॥ (मरणम् । यथा, ऋग्वेदे । ६ । १७ । ९ ।

"विश्वायुः शयथे जघान ॥"

"शयथे शयननिमित्ते मरणायेत्यर्थः ।" इति तद्भाष्ये सायणः ॥)

शयनं, क्ली, (शी + ल्युट् ।) निद्रा । शय्या । इत्यमरः ॥ (यथा, महाभारते । १ । १४५ । १४ ।

"आसनानि च दिव्यानि यानानि शयनानि च ।
विधातव्यानि पाण्डूनां यथा तुष्येत वै पिता ॥")

मैथुनम् । इति मेदिनी ॥ अथ सर्व्वदेवशयनकालः ।